13-गजः प्रथमं शुण्डया जलमादाय पश्चात् तन्मुखे निषिञ्चति।

14-एवं द्वाभ्यामवयवाभ्यां जलं पिबन् गजः 'द्विपः' इत्याख्यां भजते।

15-गजानां दृढौ तीक्ष्णौ च द्वौ दन्तौ स्तः।

16-तस्मात् ते 'दन्तिनः' 'दन्तावलाः' 'द्विरदाः' इति कथ्यन्ते।

17-शिल्पिनः करिणां दन्तै रम्याणि वस्तूनि निर्मान्ति। करेणूनां दन्तौ न स्तः।

18-यद्यपि गजा वन्या जन्तवः, तथापि ते जनैः कौशलेन गृह्यन्ते शिक्ष्यन्ते च।

19-साधु शिक्ष्यमाणास्ते जनैः कर्तुमशक्यानि कर्माणि कुर्वन्ति।

20-गुरुतराणि दारूणि कर्षन्ति।

21-शिक्षिता अपि गजास्तदा तदा मदेनोन्माद्यन्ति।

22-तदा तान आधोरणाः निशितेनाङ्कुशेन नियन्त्रयन्ति।

Sanskrit cümlelerin gramatik analizini yaparak Türkçeye çevirmek.